This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M989 विषय मंत्रशास्त्र.
नाव. दत्तात्रेय मंत्रविधानम् (MSS) मुद्रित.
लेखक/लिपीकार —.
पृष्ठ 5 काळ — पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दःसमुत्सृज्यतां ॥ ३ ॥ क्षुद्व्याधिश्चचिकित्स्यतांप्रतिदिनंभिक्षौषधंभुज्यतांस्वाहृद्यंननुयाच्यतांविधिव
शात्प्राप्तेनसंतुष्यतां ॥ औदासीन्यमभीप्सतांजनकृपानैष्ठुर्यमुत्सृज्यतांशीतोष्णादिविसह्यतांनतुवृथावा
क्यंसमुच्चार्यतां ॥ ४ ॥ एकांतेसुखमास्यतांपरतरेचेतःसमाधीयतांपूर्णात्मासुसमीक्ष्यतांजगदिदंसंबाधि
तंदृश्यतां ॥ प्राक्कर्मप्रविलाप्यतांचितिबलानाप्युत्तरंश्लिष्यतांप्रारब्धंत्विहभुज्यतामथपरब्रह्मात्मनास्थीय
तां ॥ ५ ॥ ॥ इतिश्रीशंकराचार्यविरचितंसोपानपंचकंसंपूर्णम् ॥ छ ॥ ॥ छ ॥

श्रीगणेशायनमः ॥ ॥ अथशिवरक्षाप्रारंभः ॥ अस्यश्रीशिवरक्षास्तोत्रमंत्रस्य ॥ याज्ञवल्क्यऋषिः ॥
श्रीसदाशिवोदेवता ॥ अनुष्टुप्छंदः ॥ श्रीसदाशिवप्रीत्यर्थंशिवरक्षास्तोत्रजपेविनियोगः ॥ चरितंदे
वदेवस्यमहादेवस्यपावनं ॥ अपारंपरमोदारंचतुर्वर्गस्यसाधनं ॥ १ ॥ गौरीविनायकोपेतांशिवरक्षांप
ठेन्नरः ॥ गंगाधरःशिरःपातुभालमर्धेंदुशेखरः ॥ २ ॥ नयनेमदनध्वंसीकर्णौसर्पविभूषणः ॥ घ्राणंपा
तुपुरारातिर्मुखंपातुजगत्पिता ॥ ३ ॥ जिव्हांवागीश्वरःपातुकंधरांशितिकंधरः ॥ श्रीकंठःपातुमेकंठं
स्कंधौविश्वधुरंधरः ॥ ४ ॥ भुजौभूभारसंहर्ताकरौपातुपिनाकधृक् ॥ हृदयंशंकरःपातुजठरंगिरिजाप
तिः ॥ ५ ॥ नाभिंमृत्युंजयःपातुकटिंव्याघ्राजिनांबरः ॥ सक्थिनीपातुदीनार्त्तशरणागतवत्सलः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ६ ॥ ऊरूमहेश्वरःपातुजानुनीजगदीश्वरः ॥ जंघेपातुजगत्कर्तागुल्फौपातुगणाधिपः ॥ ७ ॥ च
रणौकरुणासिंधुःसर्वांगानिसदाशिवः ॥ एतांशिवबलोपेतांरक्षांयःसुकृतीपठेत् ॥ ८ ॥ सभुत्क्वासक
लान्कामान्शिवसायुज्यमाप्नुयात् ॥ ग्रहभूतपिशाचाद्यास्त्रैलोक्येविचरंतिये ॥ ९ ॥ दूरादाशुपलायंते
शिवनामाभिरक्षया ॥ अभयंकरनामेदंकवचंपार्वतीपतेः ॥ १० ॥ भक्त्याबिभर्तियःकंठेतस्यवश्यंज
गत्त्रयं ॥ इमांनारायणःस्वप्नेशिवरक्षांयथादिशत् ॥ ११ ॥ प्रातरुत्थाययोगींद्रोयाज्ञवल्क्यस्तथालिख
त् ॥ १२ ॥ ॥ इतिश्रीयाज्ञवल्क्यप्रोक्तंशिवरक्षास्तोत्रंसंपूर्णं ॥ श्रीसांबप्रसंन्न ॥ महिम्न ॥ सोपा
नपंचक ॥ शिवरक्षा ॥ ॥ इति महिम्नः समाप्तः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३० ॥ ॥ अथ पवमान पंचसूक्त प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ यस्यवाक्यंसऋषिर्यातेनोच्यतेसादेवतायदक्षरपरिमाणंतत्छंदःश्रीपरमेश्वरप्री
त्यर्थं पौरुषंपावमानंचनतमंहोइतीतिच ॥ अस्यवामीयसूक्तंचपंचसूक्तान्यनुक्रमात् ॥ एतत्पंचसूक्तष
ठनंकरिष्ये ॥ हरिः ॐम् ॥ स॒हस्र॑शीर्षा॒पुरु॑षःसहस्रा॒क्षःस॒हस्र॑पात् ॥ सभूमिं॑वि॒श्वतो॑वृ॒त्वात्य॑तिष्ठद्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांगुलं ॥ पुरुषएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमा
तोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभ
वत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्माद्विराळजायतविराजोअधिपूरुषः ॥ सजा
तोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ १ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यं
ग्रीष्मइध्मःशरद्धविः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाअयजंतसाध्याऋषयश्चये ॥ त
स्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशूंतांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋ
चःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंतयेकेचोभयादतः ॥
गावोहजाज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ २ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकिम
स्यकौबाहूकाऊरूपादाउच्येते ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यःपद्भ्यांश
द्रोअजायत ॥ चंद्रमामनसोजातश्चक्षोः सूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत ॥ ना
भ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांअकल्पयन् ॥ सप्तास्यासं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्परिधयास्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥ यज्ञेनयज्ञमयजंतदेवास्तानिध
र्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥ ३ ॥ इतिपुरुषसूक्तंसंपूर्णं
॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ हरिः ॐम् ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इंद्रा
यपातवेसुतः ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहतं ॥ द्रुणासधस्थमासदत् ॥ वरिवोधातमोभवमंहि
ष्ठोवृत्रहन्तमः ॥ पर्षिराधोमघोनां ॥ अभ्यर्षमहानांदेवानांवीतिमंधसा ॥ अभिवाजमुतश्रवः ॥ त्वाम
च्छाचरामसितादिदर्थंदिवेदिवे ॥ इंदोत्वेनऽआशसः ॥ १ ॥ पुनातितेपरिस्रुतंसोमंसूर्यस्यदुहिता ॥ वा
रेणशश्वतातना ॥ तमीमण्वीःसमर्यऽआगृभ्णंतियोषणोदश ॥ स्वसारःपार्येदिवि ॥ तमींहिन्वंत्यग्रुवो
धमंतिबाकुरंदृतिं ॥ त्रिधातुवारणंमधु ॥ अभी३ममघ्न्याऽउतश्रीणंतिधेनवःशिशुं ॥ सोमामिंद्रायपात
वे ॥ अस्येदिंद्रोमदेष्वाविश्वावृत्राणिजिघ्नते ॥ शूरोमघाचमंहते ॥ २ ॥ पवस्वदेववीरतिपवित्रंसोमरं
ह्या ॥ इंद्रमिंदोवृषाविश ॥ आवच्यस्वमहिप्सरोवृषेंदोद्युम्नवत्तमः ॥ आयोनिंधर्णसिःसदः ॥ अधुक्षत
प्रियंमधुधारासुतस्यवेधसः ॥ अपोवसिष्ठसुक्रतुः ॥ महांतंत्वामहीरन्वापोऽअर्षंतिसिंधवः ॥ यद्गोभिर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सायिष्यसे ॥ समुद्रोऽअप्सुमामृजेविष्टंभोधरुणोदिवः ॥ सोमःपवित्रेऽअस्मयुः ॥ ३ ॥ अचिक्रदद्वृ
षाहरिर्महान्मित्रोनदर्शतः ॥ संसूर्येणरोचते ॥ गिरस्तऽइंदऽओजसाममृज्यंतेऽअपस्युवः ॥ याभिर्मदा
यशुंभसे ॥ तंत्वामदायघृष्वयऽउलोककृत्नुमीमहे ॥ तवप्रशस्तयोमहीः ॥ अस्मभ्यमिंदविंद्रयुर्मध्वः
पवस्वधारया ॥ पर्जन्योवृष्टिमाँइव ॥ गोषाऽइंदोनृषाऽअस्यश्वसावाजसाउत ॥ आत्मायज्ञस्यपूर्व्यः
॥ ४ ॥ एषदेवोऽअमर्त्यःपर्णवीरिवदीयति ॥ अभिद्रोणान्यासदं ॥ एषदेवोविपाकृतोतिव्हरांसिधाव
ति ॥ पवमानोऽअदाभ्यः ॥ एषदेवोविपन्युभिःपवमानऽऋतायुभिः ॥ हरिर्वाजायमृज्यते ॥ एषवि
श्वानिवार्याशूरोयन्निवसत्वभिः ॥ पवमानःसिषासति ॥ एषदेवोरथर्यतिपवमानोदशस्यति ॥ आवि
ष्कृणोतिवग्वनुं ॥ ५ ॥ एषविप्रैरभिष्टुतोपोदेवोविगाहते ॥ दधद्रत्नानिदाशुषे ॥ एषादिवंविधावतिति
रोरजांसिधारया ॥ पवमानःकनिक्रदत् ॥ एषादिवंव्यासरत्तिरोरजांस्यस्पृतः ॥ पवमानःस्वध्वरः ॥ ए
षप्रत्नेनजन्मनादेवोदेवेभ्यःसुतः ॥ हरिःपवित्रेऽअर्षति ॥ एषउस्यपुरुव्रतोजज्ञानोजनयन्निषः ॥ धा
रयापवतेसुतः ॥ ६ ॥ सनाचसोमजेषिचपवमानमहिश्रवः ॥ अथानोवस्यसस्कृधि ॥ सनाज्योतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सनास्व विश्वाचसोमसोभगा ॥ अथानोवस्यसस्कृधि ॥ सनादक्षमुतक्रतुमपसोममृधोजहि ॥ अथा
नोवस्यसस्कृधि ॥ पवीतारःपुनीतनसोममिंद्रायपातवे ॥ अथानोवस्यसस्कृधि ॥ त्वंसूर्यंनऽआभजत
वक्रत्वातवोतिभिः ॥ अथानोवस्यसस्कृधि ॥ ७ ॥ तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं ॥ अथानोव
स्यसस्कृधि ॥ अभ्यर्षस्वायुधसोमहिबर्हसंरयिं ॥ अथानोवस्यसस्कृधि ॥ अभ्यर्षानपच्युतोरयिंसम
सुसासहिः ॥ अथानोवस्यसस्कृधि ॥ त्वांयज्ञैरवीवृधन्पवमानविधर्मणि ॥ अथानोवस्यसस्कृधि ॥ र
यिंनश्चित्रमश्विनमिंदोविश्वायुमाभर ॥ अथानोवस्यसस्कृधि ॥ ८ ॥ सामिद्धोविश्वतस्पतिःपवमानो
विराजति ॥ प्रीणन्वृषाकनिक्रदत् ॥ तनूनपात्पवमानःशृंगेशिशानोऽअर्षति ॥ अंतरिक्षेणरारजत् ॥
ईळेन्यःपवमानोरथिर्विराजतिद्युमान् ॥ मधोर्धाराभिरोजसा ॥ बर्हिःप्राचीनमोजसापवमानस्तृणन्हरिः ॥
देवेषुदेवऽईयते ॥ उदातैर्जिहतेबृहद्द्वारोदेवीर्हिरण्ययीः ॥ पवमानेनसुष्टुताः ॥ ९ ॥ सुशिल्पेबृहतीम
हीपवमानोवृषण्यति ॥ नक्तोषासानदर्शते ॥ उभादेवानृचक्षसाहोतारादैव्याहुवे ॥ पवमानऽइंद्रोवृ
षा ॥ भारतीपवमानस्यसरस्वतीळामही ॥ इमन्नोयज्ञमागमन्तिस्रोदेवीःसुपेशसः ॥ त्वष्टारमग्रजांगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पांपुरोयावानमाहुवे ॥ इंदुरिंद्रोवृषाहरिःपवमानःप्रजापतिः ॥ वनस्पतिंपवमानमध्वासमंङ्धिधारया ॥
सहस्रवल्शंहरितंभ्राजमानंहिरण्ययं ॥ विश्वेदेवाःस्वाहाकृतिंपवमानःस्यागत ॥ वायुर्बृहस्पतिःसूर्योग्नि
रिंद्रःसजोषसः ॥ १० ॥ मंद्रयासोमधारयावृषापवस्वदेवयुः ॥ अव्योवारेष्वस्मयुः ॥ अभित्यंमद्यंमद
मिंदविंद्रऽइतिक्षर ॥ अभिवाजिनोऽअर्वतः ॥ अभित्यंपूर्व्यमदंसुवानोऽअर्षपवित्रऽआ ॥ अभिवाज
मुतश्रवः ॥ अनुद्रप्सासऽइंदवआपोनप्रवतासरन् ॥ पुनानाऽइंद्रमाशत ॥ यमत्यमिववाजिनंमृजंति
योषणोदश ॥ वनेक्रीळंतमत्यविं ॥ ११ ॥ तंगोभिर्वृषणंरसंमदायदेववीतये ॥ सुतंभरायसंसृज ॥
देवोदेवायधारयेंद्रायपवतेसुतः ॥ पयोयदस्यपीपयत् ॥ आत्मायज्ञस्यरंह्यासुष्वाणःपवतेसुतः ॥ प्रत्नं
निपातिकाव्यं ॥ एवापुनानऽइंद्रयुर्मदंमदिष्ठवीतये ॥ गुहाचिद्दधिषेगिरः ॥ १२ ॥ असृग्रमिंदवःप
थाधर्मन्नृतस्यसुश्रियः ॥ विदानाऽअस्ययोजनं ॥ प्रधारामध्वोऽअग्रियोमहीरपोविगाहते ॥ हविर्हवि
ष्षुवंद्यः ॥ प्रयुजोवाचोऽअग्रियोवृषावचक्रदद्दनं ॥ सद्माभिसत्योऽअध्वरः ॥ परियत्काव्याकविर्नृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

म्णावसानोऽअर्षति ॥ स्ववाजीसिषासति ॥ पवमानोऽअभिस्पृधोविशोराजेवसीदति ॥ यदीमृण्वंति वेधसः ॥ १३ ॥ अव्योवारेपरिप्रियोहरिर्वनेषुसीदति ॥ रेभोवनुष्यतेमती ॥ सवायुमिंद्रमश्विनासाकं मदेनगच्छति ॥ रणायोऽअस्यधर्मभिः ॥ आमित्रावरुणाभगमध्वःपवंतऽऊर्मयः ॥ विदानाऽअस्यशक्मभिः ॥ अस्मभ्यंरोदसीरयिंमध्वोवाजस्यसातये ॥ श्रवोवसूनिसंजितं ॥ १४ ॥ एतेसोमाऽअभिप्रियमिंद्रस्यकाममक्षरन् ॥ वर्धतोऽअस्यवीर्यं ॥ पुनानासश्चमूषदोगच्छंतोवायुमश्विना ॥ तेनोधांतुसुवीर्यं ॥ इंद्रस्यसोमराधसेपुनानोहार्दिचोदय ॥ ऋतस्ययोनिमासदं ॥ मृजंतित्वादशक्षिपोहिन्वंतिसप्तधीतयः ॥ अनुविप्राऽअमादिषुः ॥ देवेभ्यस्त्वामदायकंसृजानमतिमेष्यः ॥ संगोभिर्वासयामासि ॥ १५ ॥ पुनानःकलशेष्वावस्त्राण्यरुषोहरिः ॥ परिगव्यान्यव्यत ॥ मघोनऽआपवस्वनोजहिविश्वाऽअपद्विषः ॥ इंदोसखायमाविश ॥ वृष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याऽअधि ॥ सहोनःसोमपृत्सुधाः ॥ नृचक्षसंत्वावयमिंद्रपीतंस्वर्विदं ॥ भक्षीमहिप्रजामिषं ॥ १६ ॥ परिप्रियादिवःकविर्वयांसिनप्त्योर्हितः ॥ सुवानोया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिक्रविक्रतुः ॥ प्रप्रक्षयायपन्यसेजनायजुष्टोऽअद्रुहे ॥ वीत्यर्षचनिष्ठया ॥ ससूनुर्मातराशुचिर्जातोजा
तेऽअरोचयत् ॥ महान्महीऽऋतावृधा ॥ ससप्तधीतिभिर्हितोनद्योऽअजिन्वदद्रुहः ॥ याऽएकमक्षिवावृ
धुः ॥ ताऽअभिसंतमस्तृतंमहेयुवानमादधुः ॥ इंदुमिंद्रतवव्रते ॥ १७ ॥ अभिवान्हिरमर्त्यःसप्तपश्यति
वावहिः ॥ क्रिविर्देवीरतर्पयत् ॥ अवाकल्पेषुनःपुमःस्तमांसिसोमयोध्या ॥ तानिपुनानजंघनः ॥ नून
व्यसेनवीयसेसूक्तायसाधयापथः ॥ प्रवद्रोचयारुचः ॥ पवमानमहिश्रवोगामश्वंरासिवीरवत् ॥ स
नामेधांसनास्वः ॥ १८ ॥ प्रस्वानासोरथाइवार्वंतोनश्रवस्यवः ॥ सोमासोरायेऽअक्रमुः ॥ हिन्वाना
सोरथाऽइवदधन्विरेगभस्त्योः ॥ भरासःकारिणामिव ॥ राजानोनप्रशस्तिभिःसोमासोगोभिरंजते ॥
यज्ञोनसप्तधातृभिः ॥ परिसुवानासऽइंदवोमदायबर्हणागिरा ॥ सुताऽअर्षंतिधारया ॥ आपानासोविव
स्वतोजनंतऽउषसोभगं ॥ सूराऽअण्वंवितन्वते ॥ १९ ॥ अपद्वारामतीनांप्रत्नाऽऋण्वंतिकारवः ॥ वृ
ष्णोहरसऽआयवः ॥ समीचीनासऽआसतेहोतारःसप्तजामयः ॥ पदमेकस्यपिप्रतः ॥ नाभानाभिंनऽ
आददेचक्षुश्चित्सूर्यसचा ॥ कवेरपत्यमादुहे ॥ अभिप्रियादिवस्पदमध्वर्युभिर्गुहाहितं ॥ सूरःपश्यति
चक्षसा ॥ २० ॥ उपास्मैगायतानरःपवमानायेंदवे ॥ अभिदेवाँऽइयक्षते ॥ अभितेमधुनापयोथर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णोऽअशिश्रयुः ॥ देवंदेवायदेवयु ॥ सनःपवस्वशंगवेशंजनायशमर्वते ॥ शंराजन्नोषधीभ्यः ॥ बभ्र
वेनुस्वतवसेरुणायदिविस्पृशे ॥ सोमायगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावा
धावतामधु ॥ २१ ॥ नमसेदुपसीदतदध्नेदभिश्रीणीतन ॥ इंदुमिंद्रेदधातन ॥ अमित्रहाविचर्षणिःपव
स्वसोमशंगवे ॥ देवेभ्योऽअनुकामकृत् ॥ इंद्रायसोमपातवेमदायपरिषिच्यसे ॥ मनाश्चिन्मनसस्प
तिः ॥ पवमानसुवीर्यंरयिंसोमरिरीहिनः ॥ इंदविंद्रेणनोयुजा ॥ २२ ॥ सोमाऽअसृग्रमिंदवःसुताऽ
ऋतस्यसादने ॥ इंद्रायमधुमत्तमाः ॥ अभिविप्राऽअनूषतगावोवत्संनमातरः ॥ इंद्रंसोमस्यपीतये ॥
मदच्युत्क्षेतिसादनेसिंधोरूर्माविपश्चित् ॥ सोमोगौरीऽअधिश्रितः ॥ दिवोनाभाविचक्षणोव्योवारेम
हीयते ॥ सोमोयःसुक्रतुःकविः ॥ यःसोमःकलशेष्वाँऽअंतःपवित्रऽआहितः ॥ तमिंदुःपरिषस्वजे ॥
॥ २३ ॥ प्रवाचमिंदुरिष्यतिसमुद्रस्याधिविष्टपि ॥ जिन्वन्कोशंमधुश्चुतं ॥ नित्यस्तोत्रोवनस्पतिर्धी
नामंतःसंवदुर्घः ॥ हिन्वानोमानुषायुगा ॥ अभिप्रियादिवस्पदासोमोहिन्वानोऽअर्षति ॥ विप्रस्यधार
याकविः ॥ आपवमानधारयरयिंसहस्रवर्चसं ॥ अस्मेऽइंदोस्वाभुवं ॥ २४ ॥ ॐऋचोऽअक्षरेपरमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्योमन्यास्मिन्देवाऽअधिविश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतियऽइत्तद्विदुस्तऽइमेसमासते ॥ इ
तिपवमानप्रथमोध्यायः ॥ हरिःॐ ॥ सोमःपुनानोऽअर्षतिसहस्रंधारोऽअत्यविः ॥ वायोरिंद्रस्यनिष्कृ
तं ॥ पवमानमवस्यवोविप्रमभिप्रगायत ॥ सुष्वाणंदेववीतये ॥ पवंतेवाजसातयेसोमाःसहस्रंपाज
सः ॥ गृणानादेववीतये ॥ उतनोवाजसातयेपवस्वबृहतीरिषः ॥ द्युमदिंदोसुवीर्यं ॥ तेनःसहस्रिणंरयिं
पवंतामासुवीर्यं ॥ सुवानादेवासऽइंदवः ॥ १ ॥ अत्याहियानानहेतृभिरसृग्रंवाजसातये ॥ विवा
रमव्यमाशवः ॥ वाश्राऽअर्षतींदवोभिवत्संनधेनवः ॥ दधन्विरेगभस्त्योः ॥ जुष्टऽइंद्रायमत्सरःपव
मानकनिक्रदत् ॥ विश्वाऽअपद्विषोजहि ॥ अपघ्नंतोऽअराव्णःपवमानास्वर्दृशः ॥ योनावृतस्यसीद
त ॥ २ ॥ परिप्रासिष्यदत्कविःसिंधोरूर्मावधिश्रितः ॥ कारंबिभ्रत्पुरुस्पृहं ॥ गिरायदीसबंधवःपंचव्रा
ताऽअपस्यवः ॥ परिष्कृण्वंतिधर्णसिं ॥ आदस्यशुष्मिणोरसेविश्वेदेवाऽअमत्सत ॥ यदीगोभिर्व
सायते ॥ निरिणानोविधावतिजहच्छर्याणितान्वा ॥ अत्रासंजिघ्नतेयुजा ॥ नप्तीभिर्योविवस्वतःशुभ्रोन
मामृजेयुवा ॥ गाःकृण्वानोनिर्णिजं ॥ ३ ॥ अतिश्रितीतिरश्वतागव्याजिगात्यण्व्या ॥ वग्नुमियर्तियं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदे ॥ अभिक्षिपः समग्मतमर्जयंतीरिषस्पतिं ॥ पृष्ठागृभ्णतवाजिनः ॥ परिदिव्यानिमर्मृशाद्विश्वानिसोमपार्थिवा ॥ वसूनियाह्यस्मयुः ॥ ४ ॥ एषधियायात्यण्व्याशूरोरथेभिराशुभिः ॥ गच्छन्निंद्रस्यनिष्कृतं ॥ एषपुरूधियायतेबृहतेदेवतातये ॥ यत्रामृतासआसते ॥ एषहितोविनीयतेतःशुभ्रावतापथा ॥ यदीतुंजंतिभूर्णयः ॥ एषशृंगाणिदोधुवच्छिशीतेयूथ्यो ३ वृषा ॥ नृम्णादधानऽओजसा ॥ एषरुक्मिभिरीयतेवाजीशुभ्रेभिरंशुभिः ॥ पतिःसिंधूनांभवन् ॥ एषवसूनिपिब्दनापरुषायइवांऽअति ॥ अवशादेषुगच्छति ॥ एतंमृजंतिमर्ज्यमुपद्रोणेष्वायवः ॥ प्रचक्राणंमहीरिषः ॥ एतमुत्यंदशाशिपोमृजंतिसप्तधीतयः ॥ स्वायुधंमादिन्तमं ॥ ५ ॥ प्रतेसोतारऽओण्यो ३ रसंमदायघृष्वये ॥ सर्गोनतक्त्येतशः ॥ क्रत्वादक्षस्यरथ्यमपोवसानमंधसा ॥ गोषामण्वेषुसश्चिम ॥ अनप्तमप्सुदुष्टरंसोमंपवित्रऽआसृज ॥ पुनीहींद्रायपातवे ॥ प्रपुनानस्यचेतसासोमःपवित्रेअर्षति ॥ क्रत्वासघस्थमासदत् ॥ प्रत्वानमोभिरिंदवइंद्रसोमाअसृक्षत ॥ महेभरायकारिणः ॥ पुनानोरूपेऽअव्ययेविश्वाऽअर्षन्नभिश्रियः ॥ शुरोनगोषुतिष्ठति ॥ दिवोनसानुंपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्युषीधारासुतस्यवेधसः ॥ दृथापवित्रेऽअर्षति ॥ त्वंसोमविपश्चितंतनापुनानऽआयुषु ॥ अव्योवारंविधा
वसि ॥ ६ ॥ प्रनिम्नेनेवसिंधवोघंतोवृत्राणिभूर्णयः ॥ सोमाअसृग्रमाशवः ॥ अभिसुवानासऽइंदवोवृष्ट
यःपृथिवीमिव ॥ इंद्रंसोमासोऽअक्षरन् ॥ अत्यूर्मिर्मत्सरोमदःसोमःपवित्रेऽअर्षति ॥ विघ्नन्रक्षांसिदेवयुः
आकलशेषुधावतिपवित्रेपरिषिच्यते ॥ उक्थैर्यज्ञेषुवर्धते ॥ अतित्रीसोमरोचनारोहंनभ्राजसोदिवं ॥ इ
ष्णन्त्सूर्यनचोदयः ॥ अभिविप्राऽअनूषतमूर्धन्यज्ञस्यकारवः ॥ दधानाश्चक्षसिप्रियं ॥ तमुत्वावाजिनं
नरोधीभिर्विप्राऽअवस्यवः ॥ मृजंतिदेवतातये ॥ मधोर्धारामनुक्षरतीव्रःसधस्थमासदः ॥ चारुर्ऋतायपी
तये ॥ ७ ॥ परिसुवानोगिरिष्ठाःपवित्रेसोमोऽअक्षाः ॥ मदेषुसर्वधाऽअसि ॥ त्वंविप्रस्त्वंकविर्मधुप्रजा
तमंधसः ॥ मदेषुसर्वधाऽअसि ॥ तवविश्वेसजोषसोदेवासःपीतिमाशत ॥ मदेषुसर्वधाऽअसि ॥ आ
योविश्वानिवार्यावसूनिहस्तयोर्दधे ॥ मदेषुसर्वधाऽअसि ॥ यऽइमेरोदसीमहीसंमातरेवदोहते ॥ मदेषु
सर्वधाऽअसि ॥ परियोरोदसीउभेसद्योवाजेभिरर्षति ॥ मदेषुसर्वधाऽअसि ॥ सशुष्मीकलशेष्वापुनानो
ऽअचिक्रदत् ॥ मदेषुसर्वधाऽअसि ॥ ८ ॥ यत्सोमचित्रमुक्थ्यंदिव्यंपार्थिवंवसु ॥ तन्नःपुनानऽआभर ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युवंहिस्थःस्वर्पतीऽइंद्रश्चसोमगोपती ॥ ईशानापिप्यतंधियः ॥ वृषापुनानऽआयुषुस्तनयन्नाधिबर्हिषि ॥
हरिःसन्योनिमासदत् ॥ अवावशंतधीतयोवृषभस्याधिरेतसि ॥ सूनोर्वत्सस्यमातरः ॥ कुविद्वृषण्यंती
भ्यःपुनानोगर्भमादधत् ॥ याःशुक्रंदुहतेपयः ॥ उपशिक्षापतस्थुषोभियसमाधेहिशत्रुषु ॥ पवमानवि
दारयिं ॥ निशत्रोःसोमवृष्ण्यंनिशुष्मंनिवयास्तिर ॥ दूरेवासतोऽअंतिवा ॥ ९ ॥ प्रकविर्देववीतयेव्योवा
रोभिरर्षति ॥ साव्हान्विश्वाऽअभिस्पृधः ॥ साहिष्माजरितृभ्यऽआवाजंगोमंतमिन्वति ॥ पवमानःसह
स्रिणं ॥ परिविश्वानिचेतसामृशसेपवसेमती ॥ सनःसोमश्रवोविदः ॥ अभ्यर्षबृहद्यशोमघवद्भ्योध्रुवं
रयिं ॥ इषंस्तोतृभ्यऽआभर ॥ त्वंराजेवसुव्रतोगिरःसोमाविवेशिथ ॥ पुनानोवन्हेऽअद्भुत ॥ सवान्हिर
प्सुदुष्टरोमृज्यमानोगभस्त्योः ॥ सोमश्चमूषुसीदति ॥ क्रीळुर्मखोनमंहयुःपवित्रंसोमगच्छसि ॥ दध
त्स्तोत्रेसुवीर्यं ॥ १० ॥ एतेधावंतींदवःसोमाऽइंद्रायघृष्वयः ॥ मत्सरासःस्वर्विदः ॥ प्रवृण्वंतोऽअभि
युजःसुष्वयेवरिवोविदः ॥ स्वयंस्तोत्रेवयस्कृतः ॥ वृथाक्रीळंतऽइंदवःसधस्थमभ्येकमित् ॥ सिंधोरूर्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्षरन् ॥ एतेविश्वानिवार्यापवमानासऽआशत ॥ हितानसप्तयोरथे ॥ आस्मिन्पिशंगामिंदवोदधाता
वेनमादिशे ॥ योअस्मभ्यमरावा ॥ ऋभुर्नरथ्यंनवंदधाताकेतमादिशे ॥ शुक्राःपवध्वमर्णसा ॥ एतऽउ
त्येऽअवीवशन्काष्ठांवाजिनोऽअक्रत ॥ सतःप्रासाविषुर्मतिं ॥ ११ ॥ एतेसोमासऽआशवोऽरथाइवप्र
वाजिनः ॥ सर्गाःसृष्टाऽअहेषत ॥ एतेवाताऽइवोरवःपर्जन्यस्येववृष्टयः ॥ अग्नेरिवभ्रमादृथा ॥ एतेपू
ताविपश्चितःसोमासोदध्याशिरः ॥ विपाव्यानशुर्धियः ॥ एतेमृष्टाऽअमर्त्याःससृवांसोनशोश्रमुः ॥ इयक्षं
तःपथोरजः ॥ एतेपृष्ठानिरोदसोर्विप्रयंतोव्यानशुः ॥ उतेदमुत्तमंरजः ॥ तंतुंतन्वानमुत्तममनुप्रवतऽआश
त ॥ उतेदमुत्तमाय्यं ॥ त्वंसोमपणिभ्यऽआवसुगव्यानिवारयः ॥ ततंतंतुमाचिक्रदः ॥ १२ ॥ सोमाऽअ
सृग्रमाशवोमधोर्मदस्यधारया ॥ अभिविश्वानिकाव्या ॥ अनुप्रत्नासऽआयवःपदंनवीयोअक्रमुः ॥
रुचेजनंतसूर्यं ॥ आपवमाननोभरार्योऽअदाशुषोगयं ॥ कृधिप्रजावतीरिषः ॥ अभिसोमासऽआयवः
पवंतेमद्यंमदं ॥ अभिकोशंमधुश्चुतं ॥ सोमोऽअर्षतिधर्णसिर्दधानऽइंद्रियंरसं ॥ सुवीरोऽअभिशस्ति
पाः ॥ इंद्रायसोमपवसेदेवेभ्यःसधमाद्यः ॥ इंदोवाजंसिषाससि ॥ अस्यपीत्वामदानामिंद्रोवृत्राण्यप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति ॥ जघानजघनच्चनु ॥ १३ ॥ प्रसोमासोऽअधन्विषुःपवमानासऽइंदवः ॥ श्रीणानाऽअप्सुमृंजत ॥ अभिगावोऽअधन्विषुरापोनप्रवतायतीः ॥ पुनानाऽइंद्रमाशत ॥ प्रपवमानधन्वसिसोमेंद्रायपातवे ॥ नृभिर्यतोविनीयसे ॥ त्वंसोमनृमादनःपवस्वचर्षणीसहे ॥ सस्निर्योऽअनुमाद्यः ॥ इंदोयदद्रिभिःसुतःपवित्रंपरिधावसि ॥ अरमिंद्रस्यधाम्ने ॥ पवस्ववृत्रहन्तमोक्थेभिरनुमाद्यः ॥ शुचिःपावकोऽअद्भुतः ॥ शुचिःपावकऽउच्यतेसोमःसुतस्यमध्वः ॥ देवावीरघशंसहा ॥ १४ ॥ पवस्वदक्षसाधनोदेवेभ्यःपीतयेहरे ॥ मरुद्भ्योवायवेमदः ॥ पवमानधियाहितो ३ भियोनिकनिक्रदत् ॥ धर्मणावायुमाविश ॥ संदेवैःशोभतेवृषाकविर्योनावधिप्रियः ॥ वृत्रहादेववीतमः ॥ विश्वारूपाण्याविशन्पुनानोयातिहर्यतः ॥ यत्रामृतासऽआसते ॥ अरुषोजनयन्गिरःसोमःपवतआयुषक् ॥ इंद्रंगच्छन्कविक्रतुः ॥ आपवस्वमदिंतमपवित्रंधारयाकवे ॥ अर्कस्ययोनिमासदं ॥ १५ ॥ तममृक्षंतवाजिनमुपस्थेऽअदितेरधि ॥ विप्रासोऽअण्व्याधिया ॥ तंगावोऽअभ्यनूषतसहस्रधारमक्षितं ॥ इंदुंधर्त्तारमादिवः ॥ तंवेवांमेधयाह्यन्पवमानमधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्यवि ॥ धर्णसिंभूरिधायसं ॥ तमह्यन्भुरिजोर्धियासंवसानंबिवस्वतः ॥ पतिंवाचोऽअदाभ्यं ॥ तंसाना
वधिजामयोहरिंहिन्वंत्यद्रिभिः ॥ हर्यतंभूरिचक्षसं ॥ तंत्वाहिन्वंतिवेधसःपवमानगिरावृधं ॥ इंदविंद्राय
मत्सरं ॥ १६ ॥ एषकविरभिष्टुतःपवित्रेऽअधितोशते ॥ पुनानोघ्नन्नपस्त्रिधः ॥ एषऽइंद्रायवायवेस्व
र्जित्परिषिच्यते ॥ पवित्रेदक्षसाधनः ॥ एषनृभिर्विनीयतेदिवोमूर्धावृषासुतः ॥ सोमोवनेषुविश्ववित् ॥
एषगव्युरचिक्रदत्पवमानोहिरण्ययुः ॥ इंदुःसत्राजिदस्तृतः ॥ एषसूर्येणहासतेपवमानोऽअधिद्यवि ॥
पवित्रेमत्सरोमदः ॥ एषशुष्म्यसिष्यददंतरिक्षेवृषाहरिः ॥ पुनानऽइंदुरिंद्रमा ॥ १७ ॥ एषवाजीहितो
नृभिर्विश्वविन्मनसस्पतिः ॥ अव्योवारंविधावति ॥ एषपवित्रेऽअक्षरत्सोमोदेवेभ्यःसुतः ॥ विश्वाधा
मान्याविशन् ॥ एषदेवःशुभायतेधियोनावमर्त्यः ॥ वृत्रहादेववीतमः ॥ एषवृषाकनिक्रदद्दशभिर्जा
मिभिर्यतः ॥ अभिद्रोणानिधावति ॥ एषसूर्यमरोचयत्पवमानोविचर्षणिः ॥ विश्वाधामानिविश्वावि
त् ॥ एषशुष्म्यदाभ्यःसोमःपुनानोऽअर्षति ॥ देवावीरघशंसहा ॥ १८ ॥ प्रास्यधाराऽअक्षरन्वृष्णः
सुतस्यौजसा ॥ देवाँऽअनुप्रभूषतः ॥ सप्तिंमृजंतिवेधसोगृणंतःकारवोगिरा ॥ ज्योतिर्जज्ञानमुक्थ्यं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुषहासोमतानितेपुनानायप्रभूवसो ॥ वर्धासमुद्रमुक्थ्यं ॥ विश्वावसूनिसंजयन्पवस्वसोमधारया ॥
इनुहेषांसिसध्र्यक् ॥ रक्षासुनोऽअररुषःस्वनात्समस्यकस्यचित् ॥ निदोयत्रमुमुच्महे ॥ एंदोपार्थिवं
रयिंदिव्यंपवस्वधारया ॥ द्युमंतंशुष्ममाभर ॥ १९ ॥ प्रधाराऽअस्यशुष्मिणोवृथापवित्रेऽअक्षरन् ॥
पुनानोवाचमिष्यति ॥ इंदुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत् ॥ इर्यर्तिवग्नुमिंद्रियं ॥ आनःशुष्मंनृ
षाह्यंवीरवंतंपुरुस्पृहं ॥ पवस्वसोमधारया ॥ प्रसोमोऽअतिधारयापवमानोऽअसिष्यदत् ॥ अभिद्रोणा
न्यासदं ॥ अप्सुत्वामधुमत्तमंहरिंहिन्वंत्यद्रिभिः ॥ इंदविंद्रायपीतये ॥ सुनोतामधुमत्तमंसोममिंद्राय
वज्रिणे ॥ चारुंशर्धायमत्सरं ॥ २० ॥ प्रसोमासःस्वाध्यः पवमानासोऽअक्रमुः ॥ रयिंकृण्वंतिचेत
नं ॥ दिवस्पृथिव्याऽअधिभवेंदोद्युम्नवर्धनः ॥ भवावाजानांपतिः ॥ तुभ्यंवाताऽअभिप्रियस्तुभ्यमर्ष
तिसिंधवः॥सोमवर्धंतितेमहः॥आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥तुभ्यंगावोघृ
तंपयोबभ्रोदुदुह्रेऽअक्षितं ॥ वर्षिष्ठेऽअधिसानवि ॥ स्वायुधस्यतेसतोभुवनस्यपतेवयं ॥ इंदोसखित्वमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्मसि ॥ २१ ॥ प्रसोमासोमदच्युतःश्रवसेनोमघोनः ॥ सुताविदथेऽअक्रमुः ॥ आदींत्रितस्ययोषणो
हरिंहिन्वंत्यद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ आदींहंसोयथागणंविश्वस्यावीवशन्मतिं ॥ अत्योनगोभिंर
ज्यते ॥ उभेसोमावचाकशन्मृगोनतक्तोऽअर्षसि ॥ सीदन्नृतस्ययोनिमा ॥ अभिगावोऽअनूषतयोषा
जारमिवप्रियं ॥ अगन्नाजिंयथाहितं ॥ अस्मेधेहिद्युमद्यशोमघवद्भ्यश्चमह्यंच ॥ सनिंमेधामुतश्रवः ॥
॥ २२ ॥ प्रसोमासोविपश्चितोपांनयंत्यूर्मयः ॥ वनानिमहिषाऽइव ॥ अभिद्रोणानिबभ्रवःशुक्राऽऋत
स्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥ सोमाऽअर्षंतिविष्णवे ॥ ति
स्रोवाचऽउदीरतेगावोमिमंतिधेनवः ॥ हरिंरोतिकनिक्रदत् ॥ अभिब्रह्मीरनूषतयव्हीऽऋतस्यमातरः ॥
मर्मृज्यंतेदिवःशिशुं ॥ रायःसमुद्रांश्चतुरोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणः ॥ २३ ॥ प्रसुवा
नोधारयातनेंदुर्हिन्वानोऽअर्षति ॥ रुजद्दृळ्हाव्योजसा ॥ सुतऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥ सोमोऽ
अर्षतिविष्णवे ॥ वृषाणंवृषभिर्यतंसुन्वंतिसोममद्रिभिः ॥ दुहंतिशक्मनापयः ॥ भुवत्रितस्यमर्ज्योभु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदिंद्रायमत्सरः ॥ संरूपैरज्यतेहरिः ॥ अभीमृतस्यविष्टपंदुहतेपृश्निमातरः ॥ चारुंप्रियतमंहविः ॥
समेनमद्भुताऽइमागिरोऽअर्षंतिसस्रुतः ॥ धेनूर्वाश्रोऽअवीवशत् ॥ २४ ॥ आनःपवस्वधारयापवमान
रयिंपृथुं ॥ ययाज्योतिर्विदासिनः ॥ इंदोसमुद्रमीखयपवस्वविश्वमेजय ॥ रायोधर्तानऽओजसा ॥ त्व
यावीरेणवीरवोभिष्यामपृतन्यतः ॥ क्षरांणोऽअभिवार्यं ॥ प्रवाजमिंदुरिष्यतिसिषासन्वाजसाऽऋषिः ॥
व्रताविदानऽआयुधा ॥ तंगीर्भिर्वाचमीखयंपुनानंवासयामसि ॥ सोमंजनस्यगोपतिं ॥ विश्वोयस्यव्र
तेजनोदाधारधर्मणस्पतेः ॥ पुनानस्यप्रभूवसोः ॥ २५ ॥ असर्जिरथ्योयथापवित्रेचम्वोःसुतः ॥ का
र्ष्मन्वाजीन्यक्रमीत् ॥ सवन्हिःसोमजागृविःपवस्वदेववीरति ॥ अभिकोशंमधुश्चुतं ॥ सनोज्योतींषि
पूर्व्यपवमानविरोचय ॥ क्रत्वेदक्षायनोहिनु ॥ शुंभमानऽऋतायुभिर्मृज्यमानोगभस्त्योः ॥ पवतेवारेऽ
अव्ययं ॥ सविश्वादाशुषेवसुसोमोदिव्यानिपार्थिवा ॥ पवतामांतरिक्ष्या ॥ आदिवस्पृष्ठमश्वयुर्गव्ययुः
सोमरोहसि ॥ वीरयुःशवसस्पते ॥ २६ ॥ ससुतःपीतयेवृषासोमःपवित्रेऽअर्षति ॥ विघ्नन्रक्षांसिदेव
युः ॥ सपवित्रेविचक्षणोहरिरर्षतिधर्णसिः ॥ अभियोनिंकनिक्रदत् ॥ सवाजीरोचनादिवःपवमानोवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धावति ॥ रक्षोहावारमव्ययं ॥ सत्रितस्याधिसानविपर्वमानोऽअरोचयत् ॥ जामिभिःसूर्यंसह ॥ सवृत्र
हावृषासुतोवरिवोविददाभ्यः ॥ सोमोवाजमिवासरत् ॥ सदेवःकविनेषितो ३ भिद्रोणानिधावति ॥ इंदु
रिंद्रायमंहना ॥ २७ ॥ एषऽउस्यवृषारथोव्योवारोभिरर्षति ॥ गच्छन्वाजंसहस्रिणं ॥ एतंत्रितस्ययोष
णोहरिंहिन्वंत्यद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ एतंत्यंहरितोदशमर्मृज्यंतेऽअपस्युवः ॥ याभिर्मदायशुंभ
ते ॥ एषस्यमानुषीष्वाश्येनोनाविक्षुसीदति ॥ गच्छन्जारोनयोषितं ॥ एषस्यमद्योरसोवचष्टेदिवःशि
शुः ॥ यऽइंदुर्वारमाविशत् ॥ एषस्यपीतयेसुतोहरिरर्षतिधर्णसिः ॥ क्रंदन्योनिमभिप्रियं ॥ २८ ॥
आशुरर्षबृहन्मतेपरिप्रियेणधाम्ना ॥ यत्रदेवाऽइतिब्रवन् ॥ परिष्कृण्वन्ननिष्कृतंजनाययातयन्निषः ॥
वृष्टिंदिवःपरिस्रव ॥ सुतऽएतिपवित्रऽआत्विषिंदधानऽओजसा ॥ विचक्षाणोविरोचयन् ॥ अयंसयो
दिवस्परिरघुयामापवित्रऽआ ॥ सिंधोरूर्माव्यक्षरत् ॥ आविवासन्परावतोअथोऽअर्वावतःसुतः ॥ इंद्रा
यसिच्यतेमधु ॥ समीचीनाऽअनूषतहरिंहिन्वंत्यद्रिभिः ॥ योनावृतस्यसीदत ॥ २९ ॥ पुनानोऽअक्रमी
दभिविश्वामृधोविचर्षणिः ॥ शुंभंतिविप्रंधीतिभिः ॥ आयोनिमरुणोरुहद्गमादिंद्रंवृषासुतः ॥ ध्रुवेसद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिसीदति ॥ नूनोरयिंमहामिंदोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणं ॥ विश्वासोमपवमानद्युम्ना
नींदवाभर ॥ विदाःसहस्रिणीरिषः ॥ सनःपुनानआभररयिंस्तोत्रेसुवीर्यं ॥ जरितुर्वर्धयागिरः ॥ पुनान
ऽइंदवाभरसोमहिबर्हसंरयिं ॥ वृषन्निंदोनऽउक्थ्यं ॥ ३० ॥ प्रयेगावोनभूर्णयस्त्वेषाऽअयासोऽअक्र
मुः ॥ घ्नंतःकृष्णामपत्वचं ॥ सुवितस्यमनामहेतिसेतुंदुराव्यं ॥ साह्वांसोदस्युमव्रतं ॥ शृण्वेवृष्टेरिवस्व
नःपवमानस्यशुष्मिणः ॥ चरंतिविद्युतोदिवि ॥ आपवस्वमहीमिषंगोमदिंदोहिरण्यवत् ॥ अश्वावद्वा
जवत्सुतः ॥ सपवस्वविचर्षणऽआमहीरोदसीपृण ॥ उषाःसूर्योनरश्मिभिः ॥ परिणःशर्मयंत्याधारया
सोमविश्वतः ॥ सरारसेवविष्टपं ॥३१॥ जनयन्रोचनादिवोजनयन्नप्सुसूर्यं ॥ वसानोगाऽअपोहरिः ॥
एषप्रत्नेनमन्मनादेवोदेवेभ्यस्परि ॥ धारयापवतेसुतः ॥ वावृधानायतूर्वयेपवंतेवाजसातये ॥ सोमाःस
सहस्रपाजसः ॥ दुहानःप्रत्नमित्पयः पवित्रेपरिषिच्यते ॥ क्रंदन्देवांऽअजीजनत् ॥ अभिविश्वा
निवार्याभिदेवांऽऋतावृधः ॥ सोमःपुनानोऽअर्षति ॥ गोमन्नःसोमवीरवदश्वावद्वाजवत्सुतः ॥ पवस्वबृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृतीरिषः ॥ ३२ ॥ योऽअत्यइवमृज्यतेगोभिर्मदायहर्यतः ॥ तंगीर्भिर्वासयामसि ॥ तन्नोविश्वाऽअव
स्युवोगिरःशुंभंतिपूर्वथा ॥ इंदुमिंद्रायपीतये ॥ पुनानोयातिहर्यतःसोमोगीर्भिःपरिष्कृतः ॥ विप्र
स्यमेध्यातिथेः ॥ पवमानविदारयिमस्मभ्यंसोमसुश्रियं ॥ इंदोसहस्रवर्चसं ॥ इंदुरत्योनवाजसृ
त्कनिक्रंतिपवित्रऽआ ॥ यदक्षारतिदेवयुः ॥ पवस्वबाजसातयेविप्रस्यगृणतोवृधे ॥ सोमरास्व
सुवीर्यं ॥ ३३ ॥ इतिपवमानेद्वितीयोध्यायः ॥ ॥ हरि. ॐम् ॥ प्रणऽइंदोमहेतनऽऊर्मिंन्नबि
भ्रदर्षसि ॥ अभिदेवांऽअयास्यः ॥ मतीजुष्टोधियाहितःसोमोहिन्वेपरावतिं ॥ विप्रस्यधारयाकविः ॥
अयंदेवेषुजागृविःसुतऽएतिपवित्रऽआ ॥ सोमोयातिविचर्षणिः ॥ सनःपवस्ववाजयुश्चक्राणश्चारुमध्व
रं ॥ बर्हिष्मांऽआविवासति ॥ सनोभगायवायवेविप्रवीरःसदावृधः ॥ सोमोदेवेष्वायमत् ॥ सनोऽअ
द्यवसुक्तयेक्रतुविद्रातुवित्तमः ॥ वाजंजेषिश्रवोबृहत् ॥ १ ॥ सपवस्वमदायकंनृचक्षादेववीतये ॥ इंद
विंद्रायपीतये ॥ सनोऽअर्षाभिदूत्यं ॥ त्वमिंद्रायतोशसे ॥ देवान्त्सखिभ्यऽआवरं ॥ उतत्वामरुणंवयंगो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिरऋज्मोमदायकं ॥ विनोरायेदुरोदधि ॥ अत्यूपवित्रमक्रमीद्हाजीधुरंनयामनि ॥ इंदुर्देवेषुपत्यते ॥ स
मीसखायोऽअस्वरन्वनेक्रीळंतमत्यविं ॥ इंदुंनावाऽअनूषत ॥ तयापवस्वधारयाययापीतोविचक्षसे ॥
इंदोस्तोत्रेसुवीर्यं ॥ २ ॥ असृग्रन्देववीतयेत्यासःकृत्व्याऽइव ॥ क्षरंतःपर्वतादधः ॥ परिष्कृतासऽइ
न्दवोयोषेवापिच्यावती ॥ वायुंसोमाऽअसृक्षत ॥ एतेसोमासऽइंदवःप्रयस्वंतश्चमूसुताः ॥ इन्द्रंवर्धंति
कर्मभिः ॥ आधावतासुहस्त्यःशुक्राग्रृभ्णीतमंथिना ॥ गोभिःश्रीणीतमत्सरं ॥ सपवस्वधनंजयप्रयंता
राधसोमहः ॥ अस्मभ्यंसोमगातुवित् ॥ एतंमृजंतिमर्ज्यंपवमानंदशक्षिपः ॥ इंद्रायमत्सरंमदं ॥३॥ अया
सोमःसुकृत्ययामहश्चिदभ्यवर्धत ॥ मंदानऽउद्वृषायते ॥ कृतानीदस्यकर्त्वाचेतंतेदस्युतर्हणा ॥ ऋणा
चधृष्णुश्चयते ॥ आत्सोमऽइंद्रियोरसोवज्रःसहस्रसाभुवत् ॥ उक्थंयदस्यजायते ॥ स्वयंकविर्विधर्तरि
विप्रायरत्नमिच्छति ॥ यदीमर्मृज्यतेधियः ॥ सिषासतूरयीणांवाजेष्वर्वतामिव ॥ भरेषुजिग्युषामसि ॥
॥ ४ ॥ तंत्वानृम्णानिबिभ्रतंसधस्थेषुमहोदिवः ॥ चारुंसुकृत्ययेमहे ॥ संवृक्तधृष्णुमुक्थ्यंमहामाहिव्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तंमदं ॥ शतंपुरोरुरुक्षणिं ॥ अतस्त्वारयिमभिराजानंसुक्रतोदिवः ॥ सुपर्णोऽअव्यथिभरत् ॥ विश्व
स्माऽइत्स्वर्दृशेसाधारणंरजस्तुरं ॥ गोपामृतस्यविर्भरत् ॥ अधाहिन्वानऽइंद्रियंज्यायोमहित्वमानशे ॥
अभिष्टिकृद्विचर्षणिः ॥ ५ ॥ पवस्ववृष्टिमासुनोपामूर्मिंदिवस्परि ॥ अयक्ष्माबृहतीरिषः ॥ तयापव
स्वधारयाययागावऽइहागमन् ॥ जन्यासऽउपनोगृहं ॥ घृतंपवस्वधारयायज्ञेषुदेववीतमः ॥ अस्म
भ्यंवृष्टिमापव ॥ सनऽऊर्जेव्यव्ययंपवित्रंधावधारया ॥ देवासःशृणवन्हिकं ॥ पवमानोऽअसिष्यद
द्रक्षांस्यपजंघनत् ॥ प्रबबद्रोचयन्रुचः ॥ ६ ॥ उत्तेशुष्मासऽईरतेसिंधोरूर्मेरिवस्वनः ॥ बाणस्यचो
दयापवि ॥ प्रसवेतऽउदीरतेतिस्रोवाचोमखस्युवः ॥ यदव्यऽएषिसानवि ॥ अव्योवारेपरिप्रियंहरिंहि
न्वंत्यद्रिभिः ॥ पवमानंमधुश्चुतं ॥ आपवस्वमदिन्तमपवित्रंधारयाकवे ॥ अर्कस्ययोनिमासदं ॥ सप
वस्वमदिन्तमगोभिरंजानोऽअक्तुभिः ॥ इंदविंद्रायपीतये ॥ ७ ॥ अध्वर्योऽअद्रिभिःसुतंसोमंपवित्रऽ
आसृज ॥ पुनीहींद्रायपातवे ॥ दिवःपीयूषमुत्तमंसोममिंद्रायवज्रिणे ॥ सुनोतामधुमत्तमं ॥ तवत्यऽइं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोऽअंधसोदेवामधोर्व्यश्नते ॥ पवमानस्यमरुतः ॥ त्वंहिसोमवर्धयन्त्सुतोमदायभूर्णये ॥ वृषन्तस्तोतारं
मूतये ॥ अभ्यर्षविचक्षणपवित्रंधारयासुतः ॥ अभिवाजमुतश्रवः ॥ ८ ॥ परिद्युक्षःसनद्रयिर्भरद्वाजंनो
ऽअंधसा ॥ सुवानोऽअर्षपवित्रऽआ ॥ तवप्रत्नेभिरध्वभिरव्योवारेपरिप्रियः ॥ सहस्रधारोयात्तना ॥ च
रुर्नयस्तमीखयेदोनदानमीखय ॥ वधैर्वधस्नवीखय ॥ निशुष्मंमिंदवेषांपुरुहूतजनानां ॥ योऽअस्मांऽ
आदिदेशति ॥ शतंनऽइंदऽऊतिभिःसहस्रंवाशुचीनां ॥ पवस्वमंहयद्रयिः ॥ ९ ॥ उत्तेशुष्मासोऽअ
स्थूरक्षोभिदंतोऽअद्रिवः ॥ नुदस्वयाःपरिस्पृधः ॥ अयानिजघ्निरोजसारथसंगेधनेहिते ॥ स्तवाऽअबी
म्युषाद्दा ॥ अस्यव्रतानिनाधृषेपवमानस्यदूढ्या ॥ रुजयस्त्वापृतन्यतिं ॥ तंहिन्वंतिमदच्युतंहरिंन
दीषुवाजिनं ॥ इंदुमिंद्रायमत्सरं ॥ १० ॥ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः ॥ पयःसहस्रसाम्ट
षिं ॥ अयंसूर्यऽइवोपदृगयंसरांसिधावति ॥ सप्तप्रवतऽआदिवं ॥ अयंविश्वानितिष्ठतिपुनानोभुवनोप
रि ॥ सोमोदेवोनसूर्यः ॥ परिणोदेववीतयेवाजांऽअर्षसिगोमतः ॥ पुनानऽइंदविंद्रयुः ॥ ११ ॥ यवं
यवंनोऽअंधसापुष्टंपुष्टंपरिस्रव ॥ सोमविश्वाचसौभगा ॥ इंदोयथातवस्तवोयथातेजातमंधसः ॥ निब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिर्षिप्रियेसदः ॥ उतनोगोविदश्ववित्पवस्वसोमांधसा ॥ मक्षूतमेभिरहभिः ॥ योजिनातिनजीयतेहं
तिशत्रुमभीत्य ॥ सपवस्वसहस्रजित् ॥ १२ ॥ परिसोमऽऋतंबृहदाशुःपवित्रेऽअर्षति ॥ विघ्नन्रक्षां
सिदेवयुः ॥ यत्सोमोवाजमर्षतिशतंधाराअपस्युवः ॥ इंद्रस्यसख्यमाविशन् ॥ अभित्वायोषणोद
शंजारंनकन्यानूषत ॥ मृज्यसेसोमसातये ॥ त्वमिंद्रायविष्णवेस्वादुरिंदोपरिस्रव ॥ नृन्स्तोतॄन्पाह्यंहं
सः ॥ १३ ॥ प्रतेधाराऽअसश्चतोदिवोनयंतिवृष्टयः ॥ अच्छावाजंसहस्रिणं ॥ अभिप्रियाणिकाव्या
विश्वाचक्षाणोअर्षति ॥ हरिस्तुंजानऽआयुधा ॥ सममृजानऽआयुभिरिभोराजेवसुव्रतः ॥ श्येनोनवं
सुषीदति ॥ सनोविश्वादिवोवसूतोपृथिव्याऽअधि ॥ पुनानऽइंदवाभर ॥ १४ ॥ तरत्समंदीधावतिधा
रासुतस्यांधसः ॥ तरत्समंदीधावति ॥ उस्रावेदवसूनांमर्तस्यदेव्यवसः ॥ तरत्स० ॥ ध्वस्रयोःपुरुषं
त्योरासहस्राणिदद्महे ॥ तरत्स० ॥ आययोस्त्रिंशतंतनासहस्राणिचदद्महे ॥ तरत्स० ॥ १५ ॥ पव
स्वगोजिदश्वजिद्धिश्वजित्सोमरण्यजित् ॥ प्रजावद्रत्नमाभर ॥ पवस्वाद्भ्योऽअदाभ्यःपवस्वौषधी
भ्यः ॥ पवस्वधिषणाभ्यः ॥ त्वंसोमपवमानोविश्वानिदुरितातर ॥ कविःसीदन्निबर्हिषि ॥ पवमानःस्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदोजायमानोभवोमहान् ॥ इंदोविश्वाँऽअभीदसि ॥ १६ ॥ प्रगायत्रेणगायतपवमानंविचर्षणिं ॥
इंदुंसहस्रचक्षसं ॥ तंत्वासहस्रचक्षसमथोसहस्रभर्णसं ॥ अतिवारमपाविषुः ॥ अतिवारान्पवमानोऽ
असिष्यदत्कलशाँऽअभिधावति ॥ इंद्रस्यहार्द्याविशन् ॥ इंद्रस्यसोमराधसेशंपवस्वविचर्षणे ॥ प्रजा
वद्रेतऽआभर ॥ १७ ॥ अयावीतीपरिस्रवयस्तऽइंदोमदेष्वा ॥ अवाहन्नवतीर्नव ॥ पुरःसद्यऽइत्था
धियोदिवोदासायशंबरं ॥ अधत्यंतुर्वशंयदुं ॥ परिणोऽअश्वमश्वविद्गोमदिंदोहिरण्यवत् ॥ क्षरासहस्रि
